मङ्गलया

डॉ॰ अमरनाथ पाण्डेयः

मङ्गलया

डॉ॰ अमरनाथ पाण्डेयः

भारतीय विद्या प्रकाशन
दिल्ली वाराणसी

मङ्गल्या

मङ्गल्या

डॉ० अमरनाथपाण्डेयः

भारतीय विद्या प्रकाशन

दिल्ली वाराणसी

(भारत)

प्रकाशक :
भारतीय विद्या प्रकाशन
(1) 1, यू. बी., जवाहरनगर, बैंग्लोरोड, दिल्ली-110007
(2) पो. बा. नं. 1108, कचौड़ी गली, वाराणसी-221001

प्रथम संस्करण : 1998

मूल्य : 50.00

अक्षर संयोजक :
ए-वन ग्राफिक्स
एक्स-4, गली नं०-2, ब्रह्मपुरी, दिल्ली-110053
फोन-2183470

मुद्रक :
जैन अमर प्रिंटिंग एजेन्सी
जवाहरनगर, बैंग्लोरोड, दिल्ली-110007

निवेदनम्

मङ्गल्यामाश्रितोऽस्मि। अत्र नक्षत्रमालामुपहरामीति परितोषः। अधुना संस्कृतकाव्यपदव्या न तादृशं गौरवं यादृशमासीत् पुरा। पुरा कविभिः क्षुण्णाः सरणयोऽचुम्बितां प्रतिष्ठामुपजग्मुः। तस्माद् वाक्यपद्धतिर्दिदीपे, विमर्शरीतिश्च हारिणी जजृम्भे। काले काले प्रसक्तानां व्यतिकराणां समाजव्यवस्थानां कलाकल्पनाततीनाम-वधीरितावद्यक्रियाकलापानामुत्तुङ्गकोटिश्रितशास्त्रशासनानां चिकीर्षितनिष्पत्तिवितीर्णकान्तकाव्यार्थानाञ्च योजनं युगानुरूप-मनुष्ठितमितीतिवृत्तपरीक्षणेन सर्वमखर्वं तन्यते। क्वचन शास्त्र-वैदग्धी, क्वचन कल्पनामाधुरी, क्वचन शब्दार्थसाहिती, क्वचन चालङ्कारचमत्कृतिः काव्यरीतिं भूषयामास। एवं काव्य-सेतुबन्धः प्रसाधितप्रबन्ध आसीत्। तादृशं साहित्यं निर्मितं यद् विश्वसाहित्यश्रेण्यां परिगण्यते। विश्वस्मिन् प्रकाशितानां सन्दर्भाणामस्माकं साहित्येऽन्वितिः। नासम्बद्धं न चोपभुक्त-मासीत् साहित्यम्। कृतश्च भाषारीत्यादिश्रृङ्गारः। युगे युगे कृतपदानां प्रवृत्तीनामपि सन्निवेशो यथावसरं विभावनीयः। एवं संस्कृतसंस्कृतिपरम्परा परां कोटिं शिश्रिये।

यद्यपि वर्तमानशताब्द्यां निर्मितं संस्कृतसाहित्यं विपुलम्, किन्तु सारवत्ताविशेषितं तन्विति विमृशामः। ह्रसति सनातनं वित्तमुपचीयते चावस्करोऽतिमात्रमिति कलयामः। न च नवार्थ-योजनासमर्चितं काव्यं न च सुवर्णघटनापरिमण्डिता पदावली।

प्राचीनसिद्धान्तानुगनिर्मितेस्तु का कथा। न च तादृशं किञ्चिन्निर्मितं यस्य प्रभावः कालं देशञ्चातिक्रामति। नाविष्कृता नवीना पद्धतिः।

प्राचीनकालेऽस्माकं देशे सार्वभौमसाहित्यं पुरस्कृतम्। तत्परीरम्भधियैव व्यापारिता सुमनसां दृष्टिः। इदानीमपि सार्वभौमसाहित्यमुद्भवतु। 'पुराणमित्येव न साधु सर्वं न चापि काव्यं नवमित्यवद्यम्' इति कालिदासोक्तिः (मालविकाग्नि॰ 1.2) वर्तमानेऽपि सुधियः प्रवर्तयतु। 'किं सेव्यते सुमनसां मनसाऽपि गन्धः कस्तूरिकाजननशक्तिभृता मृगेण' इति जगन्नाथोक्तिः (रसगङ्गाधरः 1.6) प्रकृतेऽपि लोकोत्तरासु रचनासु जनयतु प्रीतिम्।

मङ्गल्यायां काव्यसन्दर्भः कश्चनोपायनं क्रियते। अत्र सप्तविंशतिः कविताः सन्दृब्धाः। क्वचित् प्राचीना पद्धती, क्वचिच्च नवीना। विषयभेदस्तु स्फुटः। संस्कृतभारत्याः सपर्यां नुदति। तदर्थमेवायं परिकरः। अहमपि स्वमतिपरिणामावधि ग्रथ्नामि। प्रमाणं तु सहृदयाः। काले काले भावनाकलितेतिहासनीतिदर्शनसमाजपरिष्कारादिसम्बद्धा विषया गुम्फे विन्यस्ताः। नित्यनवार्चनपद्धतिर्वर्णमविरतमनर्घ्यममितार्थमण्डितं घटयतु। प्रवर्ततां श्रेयसे भारतीति मनीषितम्।

अमरनाथपाण्डेयः

अनुक्रमः

1

सपर्या

भूषिता कुसुमैः प्रियतमा मूर्ति-
र्भावना प्रथते नियमतो लोके।
गायनै रचिता मधुरसङ्गीति-
र्दीप्यतां ललिता मधुमयी प्रीतिः।। १ ।।

कल्पना मुदिता भ्रमति कल्याणी
प्रेक्षते कविताऽभिनवगूढार्थम्।
लीलया लिखति प्रतिभया चित्रं
शाश्वतं जगतः प्रकरणं कापि।। २ ।।

मानसं विकलं तपति संशीतिः
कारणात् सततं भवति काङ्क्षा मे।
लालितं चरितं नुदति सोल्लासं
देवतां नितरां श्रयति मे चित्तम्।। ३ ।।

पीडनानुभवे व्यपगते शेषे
भाविते चरिते विमलसन्देशे।
दर्शने कलिते खलु शिवे नित्यं
मङ्गले विहिते विगलिता याच्ञा।। ४

श्रेयसे महसे प्रकटिता देशा
वीथयोऽनुपमा विरचिताः स्तोमैः।
नूतनैर्विभवैर्विलसिता भक्तिः
शोभते हृदये नवनवैर्भावैः।। ५ ।।

2

मदीया कविता

पीडाधिः संरम्भेषु
क्षणं चेतनाया ये उल्लासाः
तेषु प्रेरणामन्विष्यति
स्खलन्ती पदे पदे
पतिता गह्वरे
सुतरां दीना
याचमाना कणं कणम्
प्रतिवेशे विदेशे
क्वचिद् ह्रीणा
क्वचित् सगर्वा
तथापि प्रिया कल्याणी
रहसि सङ्गता
कविता मदीया।। १ ।।

भिक्षुकीव भिक्षमाणा
असहाया वराकी
केवलं व्याधिर्न निदानम्
वैचित्त्येन मूर्च्छिता

परस्यापि सद्मनि
सत्सङ्गतौ
स्तोत्रेषु
सुरधुनीप्रवाहेऽपि
व्यथां विभावयन्ती
लिखन्ती कस्यापि बुभुक्षितस्य बालस्य
मात्रा पित्रा वियुक्तस्य
पदानि स्मरन्ती
विवर्णा प्रतिहता
तथापि जननीव रक्षिका
कविता मदीया।। २ ।।

एकतो भ्रम एकतो ब्रह्मावगतिः पुरुषार्थः
उभाभ्यामाकृष्यमाणा
न तिष्ठति नियोगे
तथापि न त्यजति यत्नम्
खिद्यते
भूमौ लुठति
पुनरुत्थाय चलति
क्षणमपि न स्मयते
भावहीना
परन्तु न सहते पराभवम्
स्वार्थं बहु मन्यमाना
नालम्बते पुरातनीं रीतिम्

नोपदेशं शृणोति
तथापि देशं रक्षति
कविता मदीया।। ३ ।।

बन्धने
दिव्यकाले
न मुह्यति
भूतार्थं विमृश्य
सम्यगाचरति
समुद्दिधरिषति
अकूपारेऽपि
महावातक्षुभितेऽपि
व्यसनेषु निमग्नान्
विमार्गप्रस्थितानपि
सन्मार्गे प्रवर्तयति
तथापि न तत्त्वतः परिच्छिद्यते
बलात्कारकदर्थितां लिखति
गायति च यशस्तपस्विनः
अविमुक्तक्षेत्रे
मठस्य कोणे
समाधिनिष्ठस्य
क्वचन सतः
सदाचारनिरतस्य
महिमानम्

स्फुटैः पदैः पृथगर्थैः
विशदमुदीरयति
कविता मदीया।। ४ ।।

क्वचिद् मानवजातेर्निकृतिः
प्रेरयत्यभीक्ष्णम्
क्वचिज्जाल्मानां दौरात्म्यम्
विलुम्पति देशस्य पारम्पर्यम्
कलुषयति प्रवाहं सिद्धेः
शिक्षयति शाठ्यम्
विच्छिनत्ति व्यवस्थाम्
उत्खनति सरलान्
संवर्धयति कुटिलान्
नेयस्य नैकृतिकस्य मिथ्याचारः
उद्विग्नापि तैस्तैरुत्सूत्रैर्व्यवहारैः
मोघीकृतं ब्रह्मवर्चसम्
मनसिकृत्य
प्रयता
अश्रुभिरार्द्रयति पृष्ठम्
कविता मदीया।। ५ ।।

सर्वलिङ्गिनो मलिनयन्ति
सदातनं ब्रह्मभूयम्
पामराः प्रशंसन्ति हलिप्रियाम्

अपथे पदमर्पयन्ति
भारतस्य सन्निधिं गर्हन्ते
भ्रान्तास्ते समाजं कलुषयन्ति
एतादृशमत्याहितं भृशं पीडयति
उपप्लवे सीदन्ति जनाः
न बुध्यते परमार्थः
एतत्तु बुध्यते विविक्तम्
अपक्षपातेन परीक्ष्य
अर्थजातं पत्रेऽर्पयन्ति
न बिभेति क्वचन
विषमेऽपि सावष्टम्भमखिलं व्यनक्ति
परिष्वजते मां निर्भरम्
सखीजनमपि
कविता मदीया।। ६ ।।

मित्रहस्तेन क्षणं निर्ऋतिः
मां मथ्नाति
कथमकाण्डे दुष्कृतस्य विपाकः
कथं दुर्दैवस्य विलसितानि
मोहाय परापतन्ति
पुण्यं नोपकरोति
कपटकृत्यं न वेद्मि
मम तु मानवी शक्तिः
न बलवती यथा दैवी

धूर्ताः स्वार्थं साधयन्ति
कदर्थयन्ति साधून्
क्लिष्टस्य मम
न कोऽपि साहाय्यकं करोति
केवलं शरणं कविता मदीया।। ७ ।।

पुण्यं कवचम्
नित्यं पठ्यते सुसमाहितम्
जिजीविषा जिज्ञासा
न तु जिगीषा
मामहर्निशं प्रेरयति
तवैव विलासा ब्रह्माण्डे नरीनृत्यन्ते
वीक्ष्यन्ते भक्त्या
निविष्टदृष्ट्याऽनुरक्तेन
वृत्तं नावगम्यते
नानुकूला प्रवृत्तिरासाद्यते
दुर्दिने सम्प्रहरन्ते शापाः
मनोरमं कमलं विहन्यते
शुभं शकुनं न लक्ष्यते
दैवज्ञकथितं न प्रतिभाति
दिक्षु महात्रासजनकं दुर्लक्षणम्
तर्जयति
निर्जने वने रुद्यते
न कोऽपि शृणोति

क्व यामि
किं करोमि
एतादृशे व्यतिकरेऽपि
विश्वासयति
प्रसन्नवदना
कविता मदीया।। ८ ।।

उद्वेजिता निकाम विमार्गप्रस्थितैः
सतत्त्वं परामृशति षड्वर्गसन्निधौ
परिभूतापि वितनोति
सार्वजनीनमाशयम्
महाशयं सेवते
रहस्यमवगन्तुम्
निपुणमालिखति
कुहकवृत्तिं प्रवृत्ताम्
सलीलं गुम्फति स्रजं विचित्राम्
पद्मिनी वर्णयति प्रेमाभिज्ञानम्
विलीयते स्वप्नसृष्टिः
तथापि नावसन्ना
दयिता कमनीया
कविता मदीया।। ६ ।।

3

कवितार्चनम्

लालित्यं नवभङ्ग्याऽ-
दभ्रैर्भावैरखण्डसन्तानैः।
कलयन्ती कलहंसी
कवेः प्रिया विवेकं तनुते।। १ ।।

कविता नियमैर्लोकेऽ-
लौकिकं मणिमयं सदनं दीप्रम्।
रचयति कलया प्रीत्यै
सतां भाति सृष्टिरक्रान्ता।। २ ।।

मम सर्वस्वं कान्तैः
पदै रमयसि चित्तं समुद्विग्नम्।
एकाकिनी विहरसे
मन्दिरे शिवे समाराध्या।। ३ ।।

रत्नैर्भूषितमञ्चे
राजसे स्मितज्योत्स्नानिकुरम्बैः।
मधुरैर्नूपुरनादैः
करोषि भारतीशृङ्गारम्।। ४ ।।

विभवैरमितैर्गेहे
त्वामधिहृदयं भावयामि नित्यम्।
सुवर्णवर्णैर्युक्तां
सिद्धिं श्रये मुदा वाग्देवि।। ५ ।।

सान्द्रैर्भावैरखिलं
व्याप्तं विश्वमनन्तशक्तिवन्द्ये।
प्रियैर्निगूढैश्चरितै–
र्घटितं धाम मुदा ध्यायामि।। ६ ।।

ध्याने रहसि स्वान्ते
कान्तिरुदेति विभ्रमैर्मङ्गल्या।
श्रद्धापदैः सपर्यां
कलये बोधाय कल्याणि।। ७ ।।

4

कविता

कविते प्रतनु वितानम्।
उत्तुङ्गास्तरवः शोभन्ते तन्व्यः लता विलासैः,
नद्यस्तोयैः सदा प्रसन्ना हरन्ति चित्तं हासैः,
वनस्थली विविधै रूपैराश्चर्यसेतुसन्तानम्।। १ ।।

प्रकृतिसुन्दरी नवभङ्ग्या समुदेति काव्यसंसारे,
भावकल्पनासङ्घटनानिर्मितचारुताप्रसारे,
वर्तमानसन्दर्भराजिरत्येति पूर्वकविमानम्।। २ ।।

जने जने मानसी सृष्टिरभिनवं विधत्ते लोके,
क्वचिन्नर्तनं सोल्लासं रोदनं द्रुतानां शोके,
प्रतिभा प्रभवतु निजविभवैर्हृद्यं नवगीतेस्तानम्।। ३ ।।

कलया तव सङ्गमो ललितललितः सदसि प्रख्यातः,
त्वमेव रक्षित्री काले काले योगः सङ्ख्यातः,
त्वं मधुरं प्रीणयसि जनं जनयसि बोधं विज्ञानम्।। ४ ।।

वने गृहं दुःखे मोदं सङ्कोचे त्वं विस्तारम्,
सन्तापे शान्तिं बन्धे मोक्षस्य मङ्गलं द्वारम्,
निर्व्याजं साधयसि हितं तव रूपं शुभं निदानम्।। ५ ।।

जनसम्मर्दे त्वं करोषि निर्जनं सद्म सद्भावे,
सौन्दर्यं विकिरसि मानिनि रमयसि रमणीये भावे,
समुल्लासयसि कणं कणं प्राणं प्राणं प्रतिमानम्।। ६ ।।

शुभा भाति सुन्दरी शिवा कल्पिता मूर्तिसच्छाया,
सा प्रसरतु नान्या भूमौ गगने चित्ते गतमाया,
प्रतिबिम्बितं भवेत्तस्यां काम्यं कवयितुर्विधानम्।। ७ ।।

प्रीतिः क्षणे क्षणे विलसति चरितं भावयति विशेषम्,
कालनिहितविभुतारूपं कलया च कल्पनोन्मेषम्,
क्रियावलितया विच्छित्त्या रूपयति कवेः सम्मानम्।। ८ ।।

भूतभविष्यद्वर्तमानसौन्दर्यमनाहतनादम्,
सद्बोधोच्छलदमृतसिन्धुमज्जननिर्धूतविषादम्,
सदाचारपावनसमीरसन्तृप्तलोकसञ्ज्ञानम्।। ९ ।।

अनुद्भूतदर्शनं पिहिततत्त्वोन्मीलनमाख्यातम्,
शुभोदात्तवर्णनभावितसहृदयचेतोनिध्यातम्,
नाशय कालुष्यं प्रकटय मङ्गल्यं हितं समानम्।। १० ।।

सरला सृतिस्तव क्रीडा नन्दयति भावकं कम्रे,
उद्वेजयति सदा कुटिल प्रच्छन्ना भूत्वा नम्रे,
सदा प्रसन्ना तव मूर्तिर्निर्माति कवेरुद्यानम्।। ११ ।।

त्वं सहचरी हितं साधयसि पराह्लादं तन्वाना,
एकाकिनी प्रियैर्वचनैरुपदेशं खलु कुर्वाणा,
त्वं कल्पयसि नवां सृष्टिं प्रथितं लोके तव दानम्।। १२ ।।

क्वचिद् वञ्चयसि हावैस्त्वं मुग्धे तव रूपमनेकम्,
क्वचिद् ह्लादयसि भावैस्त्वं कविते साहित्यविवेकम्,
क्वचिद् भासयसि कविहृदयं यद् विलसति पदं प्रधानम्।। १३ ।।

मृत्योरमृतं गमयति यत्तज्ज्योतिर्विलसतु नित्यम्,
प्रकाशयतु सकलं विश्वं निर्मलं त्वदीयं कृत्यम्,
स्फुरतु सदा भारतदेशे दिव्यं त्वदीयपरिधानम्।। १४ ।।

सौभाग्यं प्रसरतु लोके शुभसङ्कल्पः खलु चित्ते,
विकृतिरपैतु सलीलं विलसतु सततं कान्तिर्वित्ते,
भद्रा मतिः प्रेरयतु मुदितामथ चैतन्यविधानम्।। १५ ।।

5

दीपोत्सवः

दीपोत्सव तव प्रभा वन्द्या।
रक्षोविनाशेऽतिशेते
शक्तिर्दैवी विभावैः
पदे पदे विशरारवः
बन्धा मोहस्य
विशदाः पटा वितताः
अम्बरे रवेर्गभस्तयः
दिवसो रमणीयः
रजनी कमनीया
नितरामनवद्या।।१।।

उद्घाटितं चिरन्तनम्
विभाविता रीतिः
अभिज्ञातः पन्थाः
अङ्गुलीयकलाभे
न स्मृतिरपैति
रवीति वने वने
प्रसारयति पादम्
चेतना ग्रामे नगरे

अर्चना दीप्यतेऽलङ्कृता
कथा क्रियते ब्रह्मोद्या।। २ ।।

काशते द्यौर्भूतले
हन्त मलिनीक्रियते जनैः
सौन्दर्यं कथं प्रविलीयते
रत्नं भूमौ लुठति
प्रतिहतं भेदकं चक्षुः
अन्धे तमसि तिरोहितं प्रियम्
जाल्मः प्रहरति निर्घृणम्
सकलं विकलं विपर्यस्तम्
भा भावयतु भवम्
उदीरयतु गीतं नवम्
अभिनवालोकः प्रकाशयतु विश्वम्
स्मर्यते काचिदनिन्द्या।। ३ ।।

प्रतिवर्षं भिन्नोऽन्धकारः
न परिचितोऽधिकारः
तेषु तेषु गह्वरेषु कुसृतयः
निर्भयं सर्पन्ति भुजगाः
दशन्ति पुण्यमविकलम्
निह्नोतुं प्रभवन्ति परमार्थम्
मज्जयन्ति कालियह्रदे
लोकम्पृणानि चरितानि

शून्या दिशः
काम्यन्ते नवास्तैलदीपाः
येऽपसारयन्ति गहनमन्धकारम्
उद्घाटयन्ति पिहितमपि द्वारम्
प्रकाशयन्ति निगूढमपि सञ्चारम्
शिखाभिरशेषं संसारम्
तथा क्रियते नवः सर्गः
भासते प्रकामं निसर्गः
एवमवतरति सृष्टिराद्या ॥ ४ ॥

एकतः कुटीरकेषु दीनाः
अपरतः प्रासादेषु कोटीश्वराः
विषमा वृत्तिः
धूमकेतुरिवोत्थिता
अमङ्गलं लोकस्य सन्निहितं
न पश्यन्ति विदः
भेदमहर्निशं जनयन्ति
सामरस्यं कलाभिर्दूषयन्ति
अपध्यानेषु मग्नाः
निपुणं विमार्गं दर्शयन्ति
तैस्तैः कैतवैः
सतः प्रतारयन्ति
हे दीपोत्सव किं विमृशसि
किञ्च चिकीर्षसि

प्रसक्तेषु व्यसनेषु
जनानां कृतिरवद्या।। ५ ।।

अन्विष्यति प्रीतिः प्रियं बोधम्
प्रहृष्यति लब्ध्वा सम्मोदम्
महेनानुष्ठितं कर्म
कविभिराम्नातं गीतम्
तव प्रकाशिता मूर्तिः
परिष्करोतु भारतस्य भूमिम्
सृजतु ललितम्
भावयत्वमितम्
कल्पनया कलितम्
परम्परोत्तम्भितं वृत्तम्
निवृत्तं मलिनं कृत्यम्
निर्भरमाश्लिष्टा नीतिः
उन्मिषति तव प्रभावद्रीतिः
भूतये क्रामति विश्वासः
दिष्ट्या पुनाति चिदुल्लासः
विजयते निष्पत्तिरच्छेद्या।। ६ ।।

उत्खातिनी भूमिः
गतिर्मन्दायते
लुप्ता स्मृतिः
न तत्त्वतः परिच्छिद्यते

पुरातनः संसर्गः
न रक्ष्यते परिचयः
कुटिला दृष्टिः
अनिष्टं सूचयति
अकाण्डं विवर्तनम्
चरितं नश्यति सततम्
निधानं क्षयति सनातनम्
मानं ग्लायति पुरातनम्
गङ्गा नौषधं समुपाहरति
किं काशते काशी
विस्मिता न लिखन्ति दिवौकसश्चरितम्
दीपोत्सव त्वमेव समर्थोऽसि
अभीष्टमविरतं साधयितुम्
प्रवर्ततां तव दीप्तिरभिनन्द्या।। ७ ।।

दीपो भासयति सर्वम्
न कोऽपि तस्य मित्रं न शत्रुर्नोदासीनः
सर्वत्र समत्वदृष्टिः
यथा भास्वतो. यथा चन्द्रमसः
यथाकालं तव सन्देशः
जनेषु वितरति विवेकसम्भारम्
क्षपयति दोषमपनयति विकारम्
हे दीपोत्सव तव विशेषो भरः
भारतं याचते त्वां समृद्धिं परिपोषम्

त्वं मन्त्रस्य शक्तिस्तवैव विभुता
चक्षुर्देहि
परिपालय विश्वम्
कल्पय नवं विधानम्
उपनिषत्सु गूढं संज्ञानम्
प्रासङ्गिकं निदानम्
राजतां तव प्रकाशेन
अशेषसम्पत्परिपूर्णा निषद्या।। ८ ।।

6

वसन्तोत्सवः

हे वसन्तोत्सव शीलय नवं स्वरूपं रम्यं रूपम्।
न शोभते प्राचीनम्
मनो न स्पृहयति
न ध्यायति विलासम्
न प्रेयोऽभिलषितम्
नवं युगं प्रभवति
पुराणं विलीनम्
नीतिर्नवा नृत्यति
विशदं प्रकामम्
श्रेयः पदं मनसि धत्ते
कुरुते वितानम्
यत्र स्थिरा शान्तिः
परमं भूषणम्
तेन भावय भावय
हे वसन्त सतां हृदि सत्यं सन्देशं सङ्कल्पम्।। १ ।।

तवोत्सवः कान्तः
कणे कणे लसति
दिशति देशनाम्

परिष्कारभूतये
न तु लक्ष्म्यै चञ्चलायै
दुर्विनीतानुरक्तायै
न च भोगाय न च रागाय
न च गृध्नवे
सत्त्वस्य विघाताय
यत्र विलपन्ति देवाः
द्रुतानि चरितानि
तानि तानि पूतानि
सर्वं स्थास्नु चिनु
हे मह विकृतिं छिन्धि कल्पय कल्याणं सनातनम्।। २ ।।

न मदिरा न मदः
न वाणिनीविलासाः
न च गीतानि मूर्च्छन्ति
न चोन्मादहासाः
प्रतिफलन्ति न हर्म्येषु
सततं कैतवानि
चेतना प्रसरतु
व्याप्नोतु भुवनानि
उल्लासाः प्रतिक्षणं भुवने भुवने
रमयति कलरवो वने वने
दूषितं त्यक्तम्
हे वसन्त वितर मधुरमुत्सवं मधुरम्।। ३ ।।

एकतो दृष्टिं कलुषयति कर्दमो मलिनः
लोहितो वर्णो मज्जयत्येकतोऽविकलम्
निखिलं जगत् किमनुरागेण
नैव वस्तुतो गर्हया
तव प्रभावादविरतम्
सर्वस्य लोकस्यायम्
सफलयतु नितान्तम्
अभीष्टमुत्सवः किमप्यपूर्वम्
भावना रूपं श्रयतु
सुखश्रवं वाद्यं नदतु
येनापयातु दुरितमसूया पीडा
हे वसन्त तवोत्सवो रमणीयो विलसतु निकामं रमणीयः।। ४ ।।

नवं गीतं रागैर्नवैराश्लिष्टम्
गूढं सतामभिप्रेतम्
बालानामुत्साहस्तेषु तेषु कार्येषु
वृद्धिं गतं राष्ट्रम्
पुष्यतु सलीलम्
पद्धतिं रचयतु नवाम्
बोधं कलयतुतमाम्
दृढं निर्विकारं सर्वतः
प्रभुतामाविष्करोतु
न पूर्वं दृष्टो न चानुभूतः
कोऽप्युत्सवो वसन्तस्य चित्तेऽभिनन्दितः
हे वसन्त शीघ्रं प्रेषय मेघदूतं प्रियं दूतम्।। ५ ।।

न विस्मृतिं किन्तु बोधम्
निपुणं ध्यातामथ नीतिम्
हिमालयस्योत्तुङ्गताम्
विस्मयजननीम्
सागरस्य गम्भीरताम्
रहस्यरूपाम्
चतुरन्तां महीं सुवर्णपुष्पाम्
नवोत्सवः साधयतु
तस्मात् प्रभवति
कीर्तिः समृद्धिः प्रिये देशे
सानन्दमुद्गीयते देवैः
हे वसन्तोत्सव नन्दयन्तु तव विलासा नवविलासाः।। ६ ।।

मित्राणि परस्परमालिङ्गन्ति
भूषयन्ति वर्णैः शरीरम्
मिष्टान्नैस्तर्पयन्ति सस्मितं गेहे
प्रियालापैर्गमयन्ति दिवसम्
एवं कथा प्रसरतु वर्षम्
तनोतु विश्वासं तथाविधं हर्षम्
दिवसे दिवसे
होलिकोत्सवः क्षपयतु दोषम्
जने जने जनयतु जोषम्
हे वसन्तोत्सव बोधय मानवजातिं मानवतीं जातिम्।। ७ ।।

शृङ्गमुक्तैर्वर्णोदकैः क्रीडन्ति बालाः
प्रीत्या गृह्णन्ति वयस्यान्
मधुरकथा हरन्ति चित्तम्
न तु कस्यचित् प्रतीतिवित्तम्
कल्याणी मतिरुदेतु सततम्
अपध्यानमपैतु दूरम्
साहित्यं पालयतु विश्वम्
कर्म करुणा ज्ञानं क्षरतु भक्तिम्
हे प्रियोत्सव सर्वं भद्रं सञ्चारय भद्रम्।। ८ ।।

त्वं राजसे कवीनां चित्ते
नवार्थकल्पना रामा
तान् नुदति नितान्तम्
समुन्मीलय युगानुकूलं तत्त्वम्
येन काव्यं समृद्धम्
सहृदयान् सुखयतु
प्रकाशयतु यथार्थम्
लता वृक्षा भ्रमराः
विलसन्ति मनोज्ञाः
तेषामुल्लिख चित्रं हे वसन्तोत्सव नयनाभिरामम्।। ६ ।।

नृत्येन गीतेन वाद्येन
श्रद्धयाभिनन्दनम्
न करणीयो विघ्नः

शिवस्य समाधौ
न वञ्चनीया बाला:
कामस्य विभ्रमै:
ग्रामे नगरे वने
सर्वत्र हितं पदं त्वदीयम्
प्रसारयतु सौन्दर्यं माङ्गल्यम्
शान्तिं विवेकम्
विरचय गीतं हे वसन्तोत्सव ललितं भरतगीतम्।। १० ।।

7

चेतना

न स्पष्टयति न तिरयति
पदे पदे तनुते
मोहं चिन्तां विषादम्
बहुरूपं संवादम्
कल्पितं क्षणे क्षणे
चेतना मदीया।। १ ।।

कामपि मूर्तिम्
भावितप्रसूतिम्
मनसि लग्नाम्
शुभ्रां भूतिम्
ज्योतिश्छायाम्
किरति दिव्येऽदिव्ये
मन्दिरे गह्वरे
चेतना मदीया।। २ ।।

कथं प्रवर्तते
बाह्येऽभ्यन्तरे
निगूढसंसिद्धिः

निखिलं जडं प्रकाशयन्ती
सर्वं भावयन्ती
चेतना मदीया।। ३ ।।

गुरुपदमियर्ति
कल्पनां नुदति
अभिदधाति
नीतिं प्रीतिमनुपूर्वशः
ललितं रचयति पदबन्धं समाहिता
शौटीर्यमवधीरयति
विनता निकामम्
आलिखति लतां कान्ताम्
निकुञ्जे
प्रियासङ्गता
चेतना मदीया।। ४ ।।

8

चेष्टितम्

उद्विग्नं हृदयं नितरां
प्रार्थये कृपालववित्तम्।
क्रिया प्रसिद्ध्यतु संसारे
निर्मलं भावयतु चित्तम्।। १ ।।

तिमिरे मग्नं मूढमतिं
ताडयसि गह्वरे लीनम्।
निष्पापं रमयसि रामे
कल्पयसि चरित्रमदीनम्।। २ ।।

मिथ्या वचो ऽशुभं कार्यं
तव निन्द्यं चित्तममेध्यम्।
साहित्यं सम्भवतु कथं
लोके विमलं खलु मेध्यम्।। ३ ।।

विनाशयति सर्वं कान्तं
सन्धानममङ्गलमूलम्
मतिं गतिं प्रीतिं कलिलं
कृन्तति च चरित्रं शूलम्।। ४ ।।

समीक्षसे सर्वं निपुणं
विश्वस्तं मनुजविधानम्।
जानीषे कलया नियति–
र्योजयते सदा प्रधानम्।। ५ ।।

या प्रक्रिया स्मृतौ विहिता
रचना शाश्वती प्रतिष्ठा
अनुष्ठानसङ्कल्पयुता
विभवस्य परा सा निष्ठा।। ६ ।।

त्वं रक्षसि सततं समये
सरणिं धर्मस्य विधानैः।
देशसमाजदशां नीतिं
साधयसि नवीनैर्मानैः।। ७ ।।

गतसंस्कारममङ्गल्यं
निःशेषदुरितसम्भारम्
सदा नाशयसि कीनाशं
सन्धुक्षितमघसंसारम्।। ८ ।।

९

तथात्वम्

इन्द्रं शातयति वृत्रो निरवग्रहः।
स्मेरमुखा देवाः
पश्यन्त्यपत्रपम्
उड्डामरोऽकाण्डे
निर्विशत्यभिलाषम्
उदुम्बरोऽभिनयति
व्याजेन पौरुषम्
व्युत्क्रमेण चेष्टितम्
निबद्धं काव्ये
आपाततो रमणीयम्
परिणामेऽपरूपम्
अपचितिमपमन्यते साधोर्विग्रहः।। १ ।।

कमलं कदर्थयति
शैलं हिमवन्तम्
अद्रीनारोहति
लीलया पङ्गुः
गूढप्रयोगैः
दूषयति जाल्मः

विलुप्ता भागीरथी
न निर्झरसीकराः
गङ्गापि कुल्या
न रमयति चित्तम्
अवलिप्तो मातङ्गः
बध्नाति गोष्ठीम्
निगडिता बालाः
सभासु
अश्रुभिरर्चयन्ति
कश्यं व्यसनार्ताः
कान्दिशीकं न रक्षति
विधिः शुभो ग्रहः।। २ ।।

ग्रामं प्रविष्टः
नागरिको नियतम्
कूटबन्धं रचयति
पेशलमतिरमितम्
कुट्यां गोपायति कनकम्
मुष्णाति सद्वृत्तम्
समाम्नातं सद्भिः
मृगाश्चरन्ति नगरे
वृत्त्यर्थं मोघम्
स्वभावं परित्यज्य
अपसदं सेवन्ते

दुर्विधानां कर्पटानि
न स्पृशन्ति हृदयम्
समुद्रे
प्रासादा:
अभ्रंलिहाग्रा:
विचारादुद्विजते
निभृतोऽपि लोक:
अवचेतनभूमौ लिखितं भूतार्थम्
न भावयति विज्ञ:
स्खलन्ति पदानि
सतामपि चित्रम्
न समाधत्ते महात्मनोऽपि सदाग्रह:।। ३ ।।

आढ्यो याचते वनीयकम्
कोटिम्
न स्मरति सूत्रकारं प्राकृत:
वरदराजोऽपवदते पाणिनिम्
उत्सिक्तो मूढो विद्वायते
कौलेयकोऽलङ्कृत:
सद्मनि सत्कृत:
अभिजात: पराकृत:
प्रमृष्ट: सत्पथ:
सम्भावित: कापथ:
न्यायादपेत:

अवधीरयति तत्त्वम्
सर्वत्र विप्लव:
गृहे प्रगल्भते परिग्रह:।। ४ ।।

अटव्यां रोदिति कुलाङ्गना
बुभुक्षिता बालका:
भूमौ
करकासारेऽप्याकाशतले
नग्ना: शेरते नित्यम्
न कोऽपि मनो ददाति
न प्रभवति सामाजिकस्य दर्शनम्
ह्रसति सनातनं श्रेय:
लोकायतस्य देशना प्रेय:
साम्यवादस्य वितण्डा लोके
अग्निं निगिरति
व्यामिश्राणि वाक्यानि
जनयन्ति सम्भ्रमं चित्ते
प्रजातन्त्रं बाधते देशम्
ऐतिह्यमामूलमुत्पाटयति
निकृतस्य निग्रह:।। ५ ।।

विकृता राजनीति:
आबालाम् आवृद्धम्
कलुषीकरोति सततम्

अपसारयति नीतिम्
परिष्वजते विगीतिम्
अपदानं गर्हते
मन्वर्थसारम्
रौति काकः
विरावः प्रमाणम्
फल्गु शास्ति विलुम्पकः
गूहति मुषितकम्
विघटयति समाजं देशं विश्वम्
न साधयति हितम्
हिरण्यस्य सङ्ग्रहः।। ६ ।।

10

स्वप्नः

स्वप्न मधुरं सुखं वितरसि।
अनाहूतोऽप्यागच्छसि
विविक्तादरण्यात्
प्रियकाम्यया
सविलासम्
ललितं सूत्रं सङ्ग्रथ्य
सोल्लासम्
निधाय मनीषितमङ्के
रचयन् रमणीयमुत्सवम्
भावयन् विभूतिविभ्रमम्
कल्पयन् कल्पनावल्लीम्
लालयन् लतां श्यामाम्
नर्तयन् सूनृतां वाचम्
नर्मदातटे
तरुतले
विहरन्
स्निग्ध नन्दनमुद्देशं दिशसि।। १ ।।

अनन्ता विलासाः
तिष्ठन्ति
तव शासने
एकपदे समवेतम्
समं संविधानकम्
मनोरथस्य सृष्टिः
क्रीडति
विभावैः
कविताया आकाङ्क्षा
दीप्यते हावैः
नेत्रासेचनकम्
मोहनम्
हृदयसंवादाः
अभिज्ञानम्
किमपि कामनीयकम्
प्रतीक्षितम्
मानिन्
निर्व्यलीकम्
जोषं नीलद्युतिमुपहरसि॥ २ ॥

रहस्यं जगतः
चित्तभूमौ
प्रकटयन्
तिमिरपटलेऽपि

प्रतिसङ्ख्यानम्
अवतारयन्
अवष्टम्भम्
उल्लासयन्
अन्तरायान्
अन्तरयन्
प्रमोदसंवलिता: कथा:
अनारतं कुर्वन्
समीहितमव्यवहितम्
उपपादयन्
अतिमानसम्
सत्प्रणीतं दर्शनम्
स्फुटमुपढौकयन्
कवित्वेषु कलासु
विश्रम्भसङ्कथासु
मनोरथभूमिसम्भावनासु
पेशलालापरचनासु
दिव्यभूषणालङ्कृतां मूर्तिम्
आलिखन्
मधुरं मधुरमालपन् तामदृष्टपूर्वां श्रियमर्चयसि।। ४ ।।

अपूर्वं वस्तु
प्रथयसि
अव्यक्तां पत्रलेखाम्

उन्मीलयसि
निसर्गस्य
अव्याजसुषमाम्
मम कल्पनायाः
परां काष्ठाम्
सृजसि
सुधासिन्धुशोभां
विचित्रां
दिवि दर्शयसि
लोकोत्तरं रूपम्
विशेषविच्छित्त्या
प्रकाशयसि
सकलसत्कविभावितां सृष्टिम्
झटिति चित्रपटे
अर्पयन्
काश्यां कालिन्दीं
भावयन्
वयस्य स्फुरत्कलया
ममाभिप्रेतं घटयसि।। ५ ।।

11

विपर्यासः

पुरातनं परित्यक्तम्
न निर्मितं नवीनम्
न भावयसि ललामम्
न च भूतार्थम्
अटाट्यसे भ्रान्तः
किमारोहसि
मिथ्या विकल्पम्
पदानि स्खलन्ति
पदे पदे समेऽपि
तथाप्युत्सेकः
निरवग्रहं समेधते
न मुक्तसङ्गं विमृशसि
यदस्ति राध्यम्
कविभिरनुष्ठितं वृत्तं साध्यम्।। १ ।।

अपसद व्यतिकरे
कुटिलिकया विचरसि
कल्पयसि कूटम्

अभिनन्दन्ति तवोत्पथम्
वञ्चका नितान्तम्
कथं विपरिणामः
कश्मलं मेध्येषु गणयसि
तृणाय मन्यसे महेच्छम्
आकुलीक्रियते सर्वम्
निदर्शनाभासैः
न व्यनक्ति तत्त्वम्
अपध्यानेनालिखति
तव विकृता मतिरनल्पम्
निर्भरं कलुषीकृतं सङ्कल्पम्॥ २ ॥

स्वप्नेऽपि दृष्टो विलासः
कथं प्रत्यक्षीक्रियते हासः
न श्रूयते शिञ्जितम्
क्व स्मितं ललितम्
प्रसुप्तं बोधयति
जिघृक्षसि सर्वमभिप्रेतम्
कल्पयसि नभसि चित्रम्
प्रासादं लीलया सवितानम्
द्योतयितुमीहसे सवितारम्
हे सम्भ्रान्त बुद्धमुपदिशसि
विस्मृता रीतिर्नीतिः
चिरन्तनैर्गृहीता परमा प्रीतिः॥ ३ ॥

निगूढं त्यागस्य रहस्यम्
कीदृशी लीला कश्च रासः
आत्मानं बहु मन्यसे
न परम्परायाः स्मरसि
स्वयं रचयसि
वेदं स्मृतिं पुराणम्
प्रमत्तो भ्रमसि पाथेयं त्यजसि
लब्धुमिच्छसि श्रेयः
क्षणं तिष्ठ
धेहि चित्ते धैर्यम्
कलय साहित्यम्
कल्पय भूमिकाः
निर्मातुं प्रभवति तदा
प्रतिभाऽपरिमितं समीहितं भावम्
समीक्ष्य प्रकटितं विश्वस्मिन्
शाश्वतिकमनवच्छिन्नं प्रभावम्।। ४ ।।

सर्वेषु भिन्नेषु
केवलं छलेन
न मोहय प्रगुणम्
यदि पश्यस्यभेदम्
कथं भेददृष्ट्या
विभजसि सोदर्यान्

अवसादयसि धीरान्
हे लुण्टाक, मुष्णासि मण्डनं कान्तिम्
तव निर्बाधा गतिर्लोके
जडयति सुकुमारम्
प्रसारयति विकारम्
निष्करुणं लुम्पसि कीर्तितं परिष्कारम्।। ५ ।।

सौधेषु वनिताः
प्रतिकर्म नियतम्
वितन्यन्ते लीलाः
अहर्निशं प्रतिमाः
निर्वेशस्य वार्ताः
श्रूयन्ते प्रकामम्
न शुश्रूषन्ते गुरून्
न कल्पलतांशुकानि
क्व चार्थबन्धाः
नोद्गीयते चरितम्
न मूर्च्छना मूर्च्छन्ति
प्रविलीनानि गीतानि
न प्रसाधयति नित्यं प्रीतो निसर्गः
न च खलेषु मुक्तो गर्हितः संसर्गः।। ६ ।।
क्षीबा आक्षिका आपानेषु

बद्धानुरागाः
अनुभवन्ति सम्प्रीतिम्
घटयन्ति कपटोपायान्
रहसि विकल्पैः
प्रकाशयन्ति भिन्नम्
चेष्टितं समाजे
शनैः शनैरनुसरन्ति
कूटमवेक्षया
बाधिता प्रतिपत्तिः
विवृतिर्विरुद्धा
सङ्गतमपास्तम्
चरति गृहे गृहे यातुधानः
विलोक्य भीता भ्रंशते सामिधेनी।। ७ ।।

उद्युक्तो गभस्तिः
सुवति कर्मणे
कौमुदी वितरति
स्फीतं परितोषम्
सागरस्य कल्लोलाः
उत्तालाः प्रोच्चैः
सन्दिशन्ति भारते
विधिं विशेषम्

हिमवतः शिखराणि
भावमुदात्तम्
कर्णं देहि
अनुतिष्ठादेशम्
एवं समुल्लसन्ति मङ्गलानि नित्यम्
दिवौकसो लिखन्ति विस्मिताः कृत्यम्।। ८ ।।

12

नारी

भ्रान्तस्त्वमेवं कथं
हिंसया प्रतिरुणत्सि
मार्दवमार्जवं करुणां स्नेहम्
तास्ताः प्रवृत्तीरतिवेलम्
न चिन्तयसि
यत्त्वया
सर्वमेकपदे विस्मृतम्
ताभिस्तत्र तत्र कृतम्।। १ ।।

चरितमविरतम्
साधु हितं दुर्गमे कानने
अगणितप्रत्यवाया
दृढं छित्त्वा पाशान्
सर्वमवस्करम्
भस्मसात्करोति
चिनोति यशस्करम्
काशयत्यहस्करम्
नारी परिपूते

मण्डले मण्डले
सेवावैशद्यमेतल्लक्ष्यम्
प्रसाधितं जीवने
नान्यत् कामितम्
नान्यद् गृहीतम्
केवलं केवलं ...
स्पृहयति नित्यम्
महसे सुदक्षिणा
भवने गृहारामे तपोवने दिव्या।। २ ।।

अयि चिरयति का
कथं नाविर्भवति
बाह्यमाभ्यन्तरं शोधयति
प्रभां विस्तारयति
तज्ज्योतिर्लसतु
मानसे सतां वसतु
भास्वरा कुलस्त्री
सुचरित्रा नारी।। ३ ।।

13

ग्रामबाला

ग्रामस्यालङ्करणं त्वमेव
स्मेरं मुखं नानुभूता क्लान्तिः
पदे पदे समुल्लसति
गतिर्विच्छित्तिरभ्रान्तिः
ननु किञ्चिद् भावयति
समृद्धां वल्लीम्
कामपि नितरां प्रीता
बाला ग्रामस्य
नाभरणभूषिता
तथापि मोदते श्रयते सेवाम्।। १ ।।

पश्यति निसर्गम्
रमणीयं परितः
कुड्मलिता लताः प्रसूनानि
तरून् विविधान्
नानारूपं क्षेत्रम्
सरांसि विहगश्रेणिवलयितानि
पादपेषु लीनाः
शुकपङ्क्तयस्तस्याश्चित्ते

जनयन्ति कुतुकम्
निर्भरं दृष्टिं ददाति
सर्वमाह्वयति बाला।। २ ।।

तत्र तत्र वस्तुषु कालः
बद्धभावां तां प्रेरयति
कल्पना अनन्ताः
चरितानि पूतानि
निर्मलं प्रकटीभवन्ति
न किञ्चिदाविलमारोहति
प्रकृतितनया
सदयं तयैव वर्धिता
क्षणे क्षणे रक्षिता
पूजेव गोप्या
उपकण्ठे परिभ्रमति मुदिता।। ३ ।।

आयत्यां किं निगूढम्
न जानाति भावम्
तदात्वं शोभनं दृष्टम्
निसर्गो नियतं शरणम्
न कोऽप्यन्यः सहायः
मधुरं गमयति दिवसम्
न चिन्ता न रुजा
तनुवल्लरी कान्ता
सलीलमविरतं रमयति वासूः।।४।।

तस्या ग्राम एव नगरी देशो विश्वम्
न क्वचन तादृशः समुल्लासः
तन्वीषु लतासु परमा प्रीतिः
गोवत्सेषु वृषभयुगे द्वारे
स्थिता तनुते भावम्
कुलस्य कान्तिर्हृदयम्
सन्नताङ्गी जनयति शोभाम्
हन्त विलीयते कालेन वरारोहा।। ५ ।।

14
श्रीशिवाष्टकम्

क्लेशैः सन्तप्यमानो निबिडतमसि वैक्लव्यखिन्नो निमग्नः
सङ्घातैर्वेदनानां विपुलमभिहतस्ताडितः पिण्डकेन।
अस्त्रैरश्रान्तदृष्टैरभिनवदुरितैश्छन्नचित्तप्ररोहो
याचे भक्तिं त्वदीयां निजहिततते बोधहेतो सदाहम्।। १ ।।

मार्गे प्रभ्रष्टचेता निखिलकलुषराशिं समिद्धं गतो यो
निन्दाप्रस्तावगर्भैर्वचनविकिरणैः पीडयन् साधुलोकम्।
म्लानैरज्ञानसृष्टैरवमतचरितैर्ग्लानिमानीयते यः
सोऽहं कल्याणपुञ्जं तव चरणयुगं श्रद्धया संश्रितोऽस्मि।। २ ।।

वेदे शास्त्रे पुराणे विचरसि नितरां काव्यसन्दोहसर्गे
सूत्रे वृत्तौ विशेषस्तव महिमभरो ध्यायते विज्ञवर्गैः।
उद्घोषैः पण्डितानां नवकृतिसृतिभिर्दर्शनाद्यैर्वचोभी
रम्यं गीतः पुराण प्रभुवर हृदये स्नेहपूरं निधेहि।। ३ ।।

अज्ञानव्रातधाटी व्यथयति विकलं मानसं कान्दिशीकं
शारीरा दुःखसार्था अविरतमधिकं ताडयन्तो हसन्ति।
रात्रावह्नि प्रपीडा प्रहरति मृदुले निर्घृणा मर्मधाने
दिव्यामानन्दलीलां प्रकटय भुवने स्वप्रकाशप्रसन्ने।। ४ ।।

नेदं तन्नास्ति कश्चित् प्रगुणविरचनैः स्तौति रूपं मनोज्ञं
किञ्चान्योऽभेददृष्ट्या रचयति ललितं तस्य सूक्ष्मं वितानम्।
कश्चिल्लीनः समाधौ विगलितकरणो भावयत्येव तत्त्वं
नाहं जाने क्व कीदृक् शिव शिवहृदयं मामदीनं विधेहि।। ५ ।।

न प्राप्तिर्मङ्गलानामतिशयविमला भूमिरच्छो न बोधो
जागर्या दोषदिग्धा मितमतिवितता मुग्धखेला विकल्पाः।
न स्थैर्यं याति चित्तं न हि वहति धृतिं ज्ञानसंस्थानकोशो
विग्नं नित्यं हताशं द्रढयतु निपुणं स्नेहसेकैः प्रभाते।। ६ ।।

कायेऽनन्ताः प्रदोषा वचसि न शुचिता नास्ति कार्यं प्रशस्तं
मर्यादावीथिकायां प्रसरति न युगं पादयोः शक्तिहीनम्।
क्षीणा रेखा मुखेऽस्मिन् विलुलितविभवां शान्तिमाचामतीत्थं
भूमौ क्लान्तः शयानोऽनुभवति विभवैः स्निग्धदृष्टिप्रसारम्।। ७ ।।

मोहो गाढान्धकारः कलिकुलमलिने मानसे सन्निविष्टो
दीर्घा कापि प्रमीला नयनयुगलके स्वाधिकारं विधत्ते।
व्याधिर्नित्यं शरीरे जनयति सततं कारणां मोहनञ्च
प्रीत्या चिन्तापनेया मम मृड करुणागार संसारसेतो।। ८ ।।

ज्ञाने प्रीतिः समाजे रतिरधिकतरं भातु विद्याप्रकर्षे
काम्याऽलोला नतिश्च प्रकिरतु विभवं शम्भुवीक्षा प्रसन्ना।
श्रद्धा श्रेष्ठे गुरौ च प्रसरतु सुतरां मानसे सद्विचारः
शुभ्रोदर्कं विधत्तां गिरिशगिरिजयोः कापि सङ्घाटिका मे।। ९ ।।

15

माधवः

माधव मनोऽनुरक्तं रे।
त्वद्वियोगपीडा नितरां संश्रयते,
रूपं मोहनमाशु गोपिकां नयते,
वंशीवादनकेलिकामनामुग्धा,
काचिन्मत्तं विहरति त्वद्गुणलुब्धा।
मामवेहि निजभक्तं रे।
माधव मनोऽनुरक्तं रे।। १ ।।

यमुनातटे प्रकामं दृष्टो रासः,
गोपीनां तायते विशेषविलासः,
चित्तं गवां प्रचारो हरति सलीलम्,
साधूनां पावनं शोधयति शीलम्,
महयति लीलासक्तं रे।
माधव मनोऽनुरक्तं रे।। २ ।।

पशवः सदा चरन्ति तटे सामोदम्,
शाखासु कुर्वते पक्षिणो विनोदम्,
वृक्षा लता नवै रागैरानन्दम्,
गोपानां जनयन्ति विशिष्टममन्दम्।

प्रहरति रूपं नक्तं रे।
माधव मनोऽनुरक्तं रे।। ३ ।।

लोकानां त्राता स्तूयसे समृद्धैः,
स्तोत्रैर्निर्मलभक्तिभावनानद्धैः,
सर्वं दृष्टं तव प्रसादादिष्टम्,
पूतात्मनां त्वमेव चरित्रं शिष्टम्।
प्रीणय सदा विरक्तं रे।
माधव मनोऽनुरक्तं रे।। ४ ।।

त्वं काव्यस्य राजसे नित्यं गीतिः,
त्वं प्रथितोऽसि कथासु विशुद्धा नीतिः,
त्वं ज्ञानिनां योगिनां गूढा रीतिः,
त्वं विलससि गोपीनां नव्या प्रीतिः।
हृदि तव रूपं व्यक्तं रे।
माधव मनोऽनुरक्तं रे।। ५ ।।

कामदः

कामं ददाति नितरां चरितं पुनानो
लोकं सदा सुवति भावनया समृद्धम्।
उत्तुङ्गकूटविलसत्कमनीयगात्रो
नित्यं जयत्यभिनवः खलु चित्रकूटः।। १ ।।

सत्यस्य कामपि सृतिं परिपोषयन्ति
प्राज्यां श्रियं शुभमतिं तरसा नयन्ति।
श्रीरामकोमलपदाङ्कितवर्तनानि
श्रीमन्ति चारु विलसन्ति सदायनानि।। २ ।।

दृष्टौ तथा नहि पतन्ति शिरांसि मन्ये
ज्ञातानि सम्यगवगाह्य यथा पुराणे।
ये श्रद्धया हृदि निमज्ज्य विलोकयन्ति
तेषां पुरः प्रकटितं सकलं स्वरूपम्।। ३ ।।

येषां त्वमेव शरणं जगति प्रसिद्ध-
स्ते निर्भयं प्रमुदिता विचरन्ति पादे।
दृष्टं च येन चरितं परमं पवित्रं
तस्य प्रभावममितं किल भावयामि।। ४ ।।

रामोऽवतारविभवेन तव प्रदेशे
भूयः करोतु वसतिं निजमङ्गलाय।
शृङ्गप्रभा दिवि हिता विबुधेडिता या
निर्मातु सा हृदि जनस्य मुदा विहारम्।। ५ ।।

रामस्य मित्रमसि भक्तजनस्य दिष्टं
त्वं भारतस्य हृदयं वपुषा प्रतीतः।
रक्षांस्यसाधुचरितानि समुद्यतानि
तस्माज्जयन्ति नियतं नवकीर्तनानि।। ६ ।।

श्रद्धापरिक्रमप्रीतं ये त्वामर्चन्ति कामदम्।
तेषामलौकिकी सिद्धिर्लोकमारुह्य राजते।। ७ ।।

17

त्वामन्विष्यामि

सरस्सु न कमलानि
न हंसपङ्क्तयः
शोभन्ते न तटेषु
शशिनो निष्कलङ्काः
किमिदं सर्वं प्रीणयति
हे कवे यदि त्वं पश्यसि
कथं सर्वं तिरोहितम्
नोच्छ्वसिति कणोऽपि
भ्रान्ता मतिरुद्वेल्लति
समेषां निरवग्रहा
प्रकटयति मुधा सङ्कल्पम्
हे कापटिक भावशून्यं विकल्पम्।। १ ।।

नोज्जयिनी न रामगिरिः
क्षणे क्षणे वर्द्धते वैक्लव्यम्
उत्कण्ठितो मुहुर्मुहुः पर्यटामि
भगवन्तं रामम्
महाकविं कालिदासं विक्रमादित्यम्
दिदृक्षुर्भावयामि

न क्वचिल्लभे
स्वप्न एव शरणम्
विलीनमुदात्तम्
केवलं स्मरणम्
हे शिव जागरय डमरुध्वनिभिः
मनोः सन्ततिं स्वर्गस्य विभूतिम्।। २ ।।

अद्यापि दृश्यते शोभा
दैर्घ्यमायामः
निसर्गस्य विच्छित्तिः
शिखरिणो वनानि
जलधयो निधयो जलदाः
सरितः सरांसि
निर्घृणाः कथं दूषयन्ति
कमाह्वयामि
अरण्यरुदितम्
हे महाकाल हे भारतेश्वर
रक्ष चिरन्तनम्
नितान्तमद्भुतम्
विस्मृतस्वरूपम्
निजं देशम्
विश्वस्य शिक्षकं देशम्।। ३ ।।

केन लुण्ठिता ग्रामाः
न पठ्यते पुराणम्
न बध्यते गोष्ठी
न सुहृन्मण्डलम्
कथं मनोहरम्
विलीयते लोकस्य गीतम्
यस्मिन् निबद्धम्
जीवनस्य रहस्यम्
यत्सर्वमाम्नातम्
परित्यज्यते तदेव मुग्धैः
न ग्रामं गमी
धूमेनावृतं सर्वम्
हे क्षेत्र नीराजितं त्वम्
दीपेन
कथं झटिति तिरोभवति ते दीपावली
नोत्सवा नोत्सुका जनाः
हे ग्रामदेवते त्वं कथं सुप्तासि
न रक्षसि स्वकीयं ग्रामम्
राष्ट्ररूपेणाभिनन्दितं ग्रामम्।। ४ ।।

दुर्विधानां वर्णने
न क्षमा सरस्वती
जिह्नेति
वने निवसतां

या प्रीतिस्तृप्तिर्मतिः
कथमपसारयितुं सद्वृत्तिम्
उपदिशसि
ते खलु पश्यन्ति परमार्थम्
वञ्चनया न विकुरु भावम्
कूटेन कथं प्रतारयसि
निसर्गपरिपालितान्
सरलसरलान्
न बुध्यसे मोहेन स्वरूपम्
नारद इव स्वकीयं रूपम्
हे कैतव त्यज कौरुचिकीम्
स्तुहि तेषां स्वान्तम्
सरसं कल्पनया कोमलं कान्तम्।। ५ ।।

त्वमेव रचयसि सर्वम्
न ते भौतिकं किञ्चित्
अशेषं पारमार्थिकं रूपम्
काचित् प्रार्थयते कल्याणि
उत्तिष्ठ त्रिशूलं गृहीत्वा
मोहय मधुकैटभद्वन्द्वम्
विद्रावय विपदम्
अनन्यां सिंहासने प्रतिष्ठापय
नन्दय स्वजनान्
कृपाकटाक्षैः

विहर नैजे धाम्नि सविलासम्
हे काशि गङ्गया वीजिता सोल्लासम्।। ६ ।।

गङ्गे कलुषयन्ति जाल्माः
श्वपचास्ते निकामम्
अमृतं जलं समपद्यत
पुनर्विषमिति चिन्ता
किं भगीरथः पुनरवतीर्य
त्वां शोधयिष्यति
ब्रह्माणं शिवमाराधयिष्यति
हे देवते
त्वं शिवस्य प्रत्यक्षा मूर्तिः
सत्वरं कल्पय विधानम्
निर्विघ्नं संविधानम्।। ७ ।।

18

भारतदेशः

जय देशमुकुट देवताधाम।
जय भरतदेश संस्कृतिललाम॥ १ ॥
आर्यप्रभावविश्रुतविलास।
विज्ञानविभासौरभनिवास॥ २ ॥
वेदार्थसदापावितविधान।
अष्टादशविद्यानवनिधान॥ ३ ॥
उपनिषत्तत्त्वविशदप्रभाव।
गीतोपदेशकृतनित्यभाव॥ ४ ॥
जय देशमुकुट ....

रामादिचरितपूरितनिबन्ध।
बुद्धादिकलितराष्ट्रप्रबन्ध॥ ५ ॥
भूपतेऽशोक विक्रमादित्य।
हे हर्षचरितवर्धनादित्य॥ ६ ॥
वाल्मीकिकाव्यसुरभितप्रान्त।
व्यासार्थभावनाशुद्धशान्त॥ ७ ॥
कविबाणसमीक्षितनव्यतत्त्व।
भवभूतिगिरासौन्दर्यसत्त्व॥ ८ ॥
जय देशमुकुट ....

अध्यात्ममनीषाव्यक्तबोध।
शङ्कराचार्यसिद्धान्तशोध।। ९ ।।
वेदान्तसूत्रनिर्मिताकार।
समदर्शनदूरीकृतविकार।। १० ।।
धर्मार्थनीतिमोक्षप्रकाश।
हे जनककीर्तिमिथिलाविकाश।। ११ ।।
हे याज्ञवल्क्यगार्गीविलास।
वेदार्थपुण्यसंवादभास।। १२ ।।
जय देशमुकुट ....

नैसर्गिकसुषमाजनिततोष।
हिमवत्प्रदेशसाधनाकोष।। १३ ।।
गङ्गायमुनासङ्गमवितान।
उदधिक्षालितपदपद्ममान।। १४ ।।
पद्मिनीप्रभालक्ष्मीप्रकर्ष।
राणाप्रतापशिवकीर्तिहर्ष।। १५ ।।
काशीप्रयागपरिपूतधाम।
रामेश्वरदर्शनलब्धकाम।। १६ ।।
जय देशमुकुट ....

तीर्थाटनपावनचित्तधर्म।
सत्पुरुषदेशनाशुद्धकर्म।। १७ ।।
गान्धीजीवनसाधनागेह।
स्वातन्त्र्यशेवधिप्रथितदेह।। १८ ।।

नवनीतिविभावितलोकचित्त।
सर्वोपकारसिद्धान्तवित्त।। १६ ।।
हे शान्तिदूत हे सदाचार।
निर्भयविज्ञापितसमाचार।। २० ।।
सद्वृत्तसमीहितरूपविमल।
हे देशरत्न हे कान्तिकमल।। २१ ।।
जय देशमुकुट देवताधाम।

19

महात्मा गान्धी

रम्यं भाति विधानम्।
दिव्यललाटं लम्बौ बाहू निर्मलदृष्टिरमाया।
श्वेतं परिधानं खलु शोभा सङ्गे नम्रा जाया।
भूमौ विचरति सदा निर्भयं पावनविभावितानम्।। १ ।।
रम्यं भातिविधानम्।

हस्ते लगुडः सत्यदण्ड इव नवा नीतिरनुपाया।
लोकातिगं चरित्रं सर्वं लीला विगतापाया।
सत्यं परमेश्वरो राजते तस्य बोधसन्तानम्।। २ ।।
रम्यं भाति विधानम्।

अहिंसया चरितं प्रसाधितं सतां समग्रा रीतिः।
किमपि भूषणं लसति शरीरे दैवी प्रभा प्रतीतिः।
कल्याणस्य सेतुराम्नातो लोकमित्रमवदानम्।। ३ ।।
रम्यं भाति विधानम्।

कृतः स्वतन्त्रो भारतदेशः प्राप्तो नवः प्रबोधः।
धन्या मही भारतीयेयं विलयं गतो विरोधः।
गान्धी कृती विजयते सततं लोकस्यास्य निधानम्।। ४ ।।
रम्यं भाति विधानम्।

भारतराष्ट्रहितं पुण्यं योगी ज्ञानी निर्माता।
शरणं मोक्ता चरति सदा ब्रह्मणि निर्मन्युर्दाता।
कीर्तिविलासः सत्यरूपमच्छिद्रवृत्तिसन्धानम्।। ५ ।।
रम्यं भाति विधानम्।

दुःखितकल्याणाय जनि लेभे दिव्यात्मा लोके।
जनताया बन्धुर्न्याय्ये पथि दृष्टश्चारु विशोके।
नीतिः कापि निर्मिता विश्वे परिभावस्य निदानम्।। ६ ।।
रम्यं भाति विधांनम्।

विस्मयकारि सदा चरितं भावितं शीलितं कान्तम्।
अनासक्तियोगोऽभ्यस्तः साधनं पवित्रं शान्तम्।
सद्व्यापारमयी वृत्तिः शास्त्रस्य विशुद्धं मानम्।। ७ ।।
रम्यं भाति विधानम्।

स्वातन्त्र्यं परमं तत्त्वं दर्शनं तस्य विख्यातम्।
अनालस्यजीवनं लोकमर्यादाकरणं ध्यातम्।
मनो विशुद्धं वचो विशुद्धं कर्म विशुद्धं ज्ञानम्।। ८ ।।
रम्यं भाति विधानम्।

20

वनम्

हे वन विकिर कल्पनां रम्यां
गता पुराणी रीतिः।
देशं कालं कलय तुलायां
प्रभवति नव्या नीतिः।। १ ।।

वृक्षैर्लताभिरत्यन्तं ते
गात्रं विभु कमनीयम्।
सदा पोषयसि तपस्विनं रे
खगं मृगं महनीयम्।। २ ।।

लुण्टाकं जाल्मं श्वपचं किं
प्रियं मानयसि चित्ते।
शरणं यान्ति तवैव निर्भयं
वृद्धिः किं तव वित्ते।। ३ ।।

मित्रत्वं ते कथं श्रिताः किल
किं न बुध्यसे भावम्।
विकृतिं यास्यति तवाकृतिः खलु
नोद्भावयसि विभावम्।। ४ ।।

भावय निजं स्वभावं पूतं
चरितं विबुधैर्गीतम्।
यदि नंक्ष्यति तव विभुता लोके
तव भारतं प्रमीतम्।। ५ ।।

सीतारामपदाङ्का भूमि–
र्दिव्यलोकसञ्चारः।
सन्तर्पणं परं दिवौकसां
कोऽप्यव्यक्तविहारः।। ६ ।।

पञ्चवटीनिर्माणं रम्यं
क्षणे क्षणे सन्देशम्।
किं न साधयति धर्मदेशनां
किं न भूषयति देशम्।। ७ ।।

सीतासहितो विचरतु राम–
श्चित्रकूटपरिवेशे।
पावनवनं तर्पयतु हृदयं
भक्तिं तनुतां देशे।। ८ ।।

कणः कणः पावनोऽनुरक्तो
दत्त्वा प्रभुसन्देशम्।
प्रतिध्वनिं शीलयति मनोज्ञं
स्पन्दाङ्कितं प्रदेशम्।। ९ ।।

सीताचरितसमुत्कर्षः खलु
रसव्यक्तिनवबोधः।
सदा प्रेरयति कविं सहृदयं
हे वन तव प्रबोधः।। १० ।।

शकुन्तलादुष्यन्तदर्शनं
गोसेवाप्रतिमानम्।
रामायणरचनाकीर्तिः सा
कविवाल्मीकिविधानम्।। ११ ।।

नवनैमिषारण्यसौन्दर्यं
लोके प्रसरतु तूर्णम्।
कल्याणी सुमतिर्देवानां
समुन्मीलयतु पूर्णम्।। १२ ।।

शान्तं रूपमनाविद्धं सन्
मतं मुनीनां गूढम्।
सरो निर्मलं महाश्वेतया
कृतं प्रतिष्ठारूढम्।। १३ ।।

पुरातनस्ते महिमा विलसति
गाथा नवा प्रकामम्।
निर्विकारविस्तारः कान्तो
लोकं सुवति निकामम्।। १४ ।।

वृक्षं लतां पल्लवं शाखां
छिन्धि नैव निष्करुणम्।
हे मनुष्य निसर्गशोभा ते
प्रियं हितं चाभरणम्।। १५ ।।

शान्तिदूत भावयसि कलां त्वं
कविगुरुरवीन्द्रगीतम्।
काव्यं येन निर्मितं ललितं
विश्वचेतनां नीतम्।। १६ ।।

मृगं कोमलं पालयसि त्वं
जीवदयाविस्तारम्।
ओषधिभिर्मण्डयसि नवीनं
नीरोगं संसारम्।। १७ ।।

अप्रतिहता तनुः सौन्दर्यं
हरति मनः सविशेषम्।
आश्लिष्यति निर्जने प्रगाढं
भस्मीकुरुते द्वेषम्।। १८ ।।

दत्तं त्वया ज्ञानविज्ञानं
काव्यं योगवितानम्।
विश्वं येन विस्मितं सर्वं
सिद्धं द्युतितं मानम्।। १९ ।।

त्वं सर्वस्वं चरितमपारं
रत्नराशिरतिवेलम्।
यच्छसि सिद्धिं समीहितां तां
विपुलां मुदा सहेलम्।। २० ।।

हे योगिन् हे धर्मदूत हे
सदाचार युगभावे।
विरचय काव्यं प्रियं श्रेयसे
शान्तं स्थित स्वभावे।।२१।।

21

उपत्यकामध्ये

शोभा परा शिखरिणः प्रसृतान्तरिक्षे
पादप्रसारमहिमा कलुषं क्षिणोति।
लीलाप्रपातरचिता खचिताथ पुण्यै-
र्वीथी च लेखकलिता लिखति प्रभावम्।। १ ।।

धारा च निर्मलमतिः सुधियां प्रवृत्ता
लोकं पुनाति जनयत्यमलं विवेकम्।
स्वच्छप्रवाहकविताविनिता समग्रं
लावण्यसिन्धुचरितं घटयत्यजस्रम्।। २ ।।

उत्तुङ्गशैलशिखरप्रथिता प्रतीतिः
सौजन्यधाम वसतिर्ललिताऽमराणाम्।
चित्तप्रसादकथितं चरितं समीड्यं
पुण्यप्रमाणमखिलं पुरतो विभाति।। ३ ।।

मूर्तिर्निसर्गरचिता सुरसुन्दरीभि-
र्दिव्यं विधानमखिलं लिखितं चकास्ति।
योगः परो विलसति प्रमया मितो यः
तत्सर्वमेव कलया कलितं रहस्यम्।। ४ ।।

शैवाट्टहासपरिनिष्ठितशुद्धबोधो
नित्यं प्रजागरसमिद्धतपःस्वरूपम्।
स्नेहप्रसूतिरविकम्पितभावनद्धा
सिद्धा कृपा भ्रमति मूर्तिमती शिवायाः।। ५ ।।

वृक्षा लता फलभरेण नता नितान्तं
सौन्दर्यराशिरज़िरे निचितो विधात्रा।
चित्तं प्रसादयति कान्तमिदं शरीरं
प्राज्यं प्रयच्छति निधिं निहितं गुहायाम्।। ६ ।।

दृष्टा समाधिगहने प्रतिभा स्फुरन्ती
या भासयत्यधिगुणं जगतः स्वरूपम्।
निःशेषरूपरचनानिपुणं सतत्त्वं
निर्माति काव्यममरं किल मण्डनाय।। ७ ।।

22

चिरन्तनं भावय रे

चिरन्तनं भावय रे।
इतस्ततो विचरसि नितरां भ्रान्तः।
न परिचिनोषि हितं सततं क्लान्तः।
आभासं मिथ्या तनुषेऽशान्तः
भूतार्थं मण्डय रे ॥ १ ॥

लघु लघु निर्मासि चित्रं विविक्ते।
मधुरं विमृशसि मानसेऽनुरक्ते।
निर्णीतं विस्मरसि मुधाव्यक्ते।
आसङ्गं शिथिलय रे॥ २ ॥

लताभिरमन्दं प्रीणयसि चित्तम्।
मुधा व्ययीकरोषि पूतं वित्तम्।
क्षपयसि दिवसं न रक्षसि प्रत्तम्।
सुकृतं परिशीलय रे॥ ३ ॥

नवा सृष्टिरुदेत्यन्वहं लोके।
अभिभूतो निमज्जति जनः शोके।
हिंसाया लक्षणं फलति कोके।
मनीषां प्रकाशय रे॥ ४ ॥

कुटिलिकया किं न भ्रमस्यमन्दम्।
जिघृक्षसि कपटेन पूर्णानन्दम्।
न क्षमो भावयितुं शिवं नन्दम्।
विकल्पमपसारय रे।। ५ ।।

समाजे नृशंसास्तुदन्ति नित्यम्।
नोन्मीलयन्ति गूढं स्वं कृत्यम्।
हितमपि नावबुध्यन्त इति चिन्त्यम्।
विविक्तं विभूषय रे।। ६ ।।

भारतस्य गौरवं ये श्रयन्ते।
सर्वत्र महिमानं ते भजन्ते।
परां कीर्तिं विश्वस्मिलँ लभन्ते।
देशनां प्रसारय रे।। ७ ।।

काले काले दृश्यते प्ररोहः।
विषमेऽपि संलक्ष्यते सन्दोहः।
द्रागपोह्यते दूषकः प्रमोहः।
प्रसक्तमथ चिन्तय रे।। ८ ।।

23

काशते शिवस्य त्रिशूले

काशते शिवस्य त्रिशूले।
गङ्गालहरीविलासः
जगन्नाथस्य हासः
राजते प्रकामम्
भक्तिप्ररोहः
शान्तिमानन्दं मुक्तिम्
प्रददाति सिसृक्षाम्
कवेः कल्पनालोके
प्रसीदति शिवा मूले।। १ ।।

आयतनं विद्यायाः
प्रतोल्यां विचरति
मन्दिरे मठे शिवालये
साधकानां मण्डलम्
रचयति पदम्
पश्यति परमम्
ध्यायति चिरन्तनम्
भासयत्यसमम्
भास्वरं विभातम्
गङ्गायाः कूले।। २ ।।

अकल्पितं भासते
मनीषितं प्रकाशते
चरितं निष्कलङ्कम्
काव्यस्य विषयः
सरलं श्रयते
मुदा तनुते
बोधमपरिमितम्
गूढं चेष्टितम्
लिखितं विविक्तम्
तरङ्गा गणयन्ति
कलां कल्पनां निष्ठां समाधिम्
पटले मङ्गल्ये मञ्जुले।। ३ ।।

विषमा प्रतीतिः
उदेति मानसे
विलयं याति काले
समाहिते चित्ते
विश्वं भ्रमति
भावयति नेदिष्ठम्
दविष्ठं तत्त्वम्
विगलितवेद्यान्तरमानन्दम्
आश्लिष्यति प्रकामम्
विलीने शूले।। ४ ।।

जीवनमनिर्वचनीयम्
सरला गतिः
पूतं सीकरैर्वसनम्
रहस्यं लोकस्य
उन्मीलयति विशदम्
सलीलं नृत्यति
सृष्टिसौन्दर्यम्
बध्नाति काव्यम्
सरस्वती सोल्लासम्
सहृदयाः पठन्ति
परिशीलयन्ति भावम्
असङ्ख्यातां विच्छित्तिम्
प्रस्फुटे शीले प्राञ्जले।। ५ ।।
स्फुरति सत्ता
रचना विशेषैः
भङ्ग्या स्यन्दते
भवस्य भवने
शास्त्राणि राजन्ते
अध्वराः प्रभवन्ति
विधिना गृहेषु
चिरत्ने नगरे
शाश्वतिकः पुरुषः
वितरति शिवतातिम्
अपुनर्भवं कृपया

फलिता प्रज्ञा
स्वान्तेऽनुकूले।। ६ ।।

तत्त्वमसि निर्भरम्
उपदिशति मुक्त्यै
कामयते समाधिम्
अनायासं लोकः
अध्यूढस्य शासने
सर्वं सुलभम्
स्वच्छन्दं विहरति
ऋतम्भरा प्रज्ञा
सविलासं ग्रथ्नाति योगस्य सूत्रम्
महाभाष्यमवदातम्
तन्यते सरहस्यम्
महामृत्युञ्जयः
वितरत्यायुष्यं दीर्घम्
आलये ज्ञानं दिशत्यसङ्कुले।। ७ ।।

24

काशी मम शरणम्

काशी मम शरणम्।

विकलो मायया ऽहर्निशम्।
अनुभवामि खिन्नः क्लेशम्।
आश्रये नित्यं महेशम्।
शिथिलं मम करणम्।। १ ।।

पदे पदे प्रिया विस्मृतिः।
नैश्वर्यं केवलां नतिः।
ताडयति मां मुग्धा मतिः।
क्व रम्यमाभरणम्।। २ ।।

न शान्तिर्लभ्यते देशे।
न रिक्थमर्ज्यते विदेशे।
कथं संस्तवो निर्वेशे।
शुभं तव स्मरणम्।। ३ ।।

न नन्दनं पुष्पोद्याने।
न विलासाः स्फुरन्ति याने।

न धैर्यं तिष्ठति विमाने।

कलयाम्याचरणम्।। ४ ।।

कल्याणं शिवस्य चरितम्।
सनातनं दर्शनं हितम्।
रत्नं भास्वरं निर्मलम्।

शाश्वतिकं भरणम्।। ५ ।।

25

सखे गच्छामि काशीमहं सत्वरम्

सखे गच्छामि काशीमहं सत्वरम्।

यत्र गङ्गातटं शोभते पावनम्,
यात्रिभिः सङ्कुला वीथयो मण्डनम्,
यत्र पूजा शिवस्यान्वहं तन्यते,
यत्र नार्योऽनुरक्ताः समाराधने।
यत्र जागर्ति बोधः परो निर्भरम्।। १ ।।

यत्र रथ्यासु वाणी भ्रमत्युत्तमा,
त्रायते दुष्कृतात् सदा भक्तानुमा,
यत्र घण्टाध्वनिः पापविध्वंसकः,
मर्म शास्त्रस्य नित्यं समुद्घुष्यते।
यत्र विद्या नरीनृत्यते सस्वरम्।। २ ।।

वेदशास्त्रादिपाठः समारभ्यते,
यत्र सङ्गीतसाहित्यमाश्रीयते,
लोकरीतिर्विलासैः समालिङ्गता,
यत्र देशः समग्रः समुद्भाव्यते।
यत्र सन्तो बुधाः पूजिता भास्वरम्।। ३ ।।

मालवीया कृतिर्विश्वविद्यालयः,
संस्कृतस्यापि सम्मानितः पण्डितैः,
राष्ट्ररत्नेन गुप्तेन संस्थापितम्,
शोभतेऽनर्घपीठं युतं विद्यया।
यत्र देवाः समुत्काः श्रयन्त्यध्वरम्।। ४ ।।

यत्र मृत्योर्भयं नास्ति सन्त्रासनम्,
लीलया यत्र मुक्तिः समालिङ्ग्यते,
मन्दिरं विश्वनाथस्य विस्मापकम्,
जाह्नवी वीचिभिर्ह्लादतेऽहर्निशम्।
यत्र तत्त्वं शिवं राजते स्थावरम्।। ५ ।।

26

त्वं राजसे शुभे निलये

त्वं राजसे शुभे निलये।

वितरसि हितं सततम्।
हरसि भीतिं नियतम्।
दिशसि तत्त्वं प्रततम्।
लीलामहं मुदा कलये।। १ ।।

सम्मोहयसि वामम्।
विद्रावयसि कामम्।
नुतमवसि प्रकामम्।
सर्वं स्मृतं मोहविलये।। २ ।।

तमसि लीयते मतिः।
स्खलति चञ्चला गतिः।
नानुकूला नियतिः।
मनः प्रसीदति शिवालये।। ३ ।।

चेतनोल्लसति सदा।
नीतिः फलति शुभदा।

कीर्तिरिति संविदा।
आनन्दः स्यन्दते लये।। ४ ।।

त्वं शाश्वतं शरणम्।
स्मृत्या सदाचरणम्।
शुभस्य तथा वरणम्।
सुधासिन्धुमथ निभालये।। ५ ।।

27

श्रीजगन्नाथस्तोत्रम्

जनैर्नित्यं ध्यातो मधुरमधुरं स्वान्तनिलये
प्रभो सर्वं काम्यं दिशसि विबुधानां सुखनिधिम्।
सदाराध्यो भूतिं विनयमथ नीतिं नियमतो
जगन्नाथं देवं स्मरत जनकल्याणवसतिम्।। १ ।।

परा मूर्तिः पुर्यां विलसति बुधानां हृदि धृता
समेषामानन्दं सृजति कमनीया द्युतिमयी।
सुधावृष्ट्या लोकं मदयति विलासैरनुदिनं
जगन्नाथं देवं स्मरत जनकल्याणवसतिम्।। २ ।।

प्रिया यात्रा चित्तं हरति दुरितञ्चाथ निचितं
शुभं सूते लोके परमकुतुकाह्लादजननी।
महो द्रष्टुः पुण्यं जनयति च कीर्तिं स्थितिमयीं
जगन्नाथं देवं स्मरत जनकल्याणवसतिम्।। ३ ।।

कथा रम्या श्रोतुः कलुषविपिनं नाशयति साऽ-
मितं देवस्यैवं चरितमपरं स्वर्गफलदम्।
पुराणेष्वाख्यातं स्तुतिभिरनुविद्धं विलसितं
जगन्नाथं देवं स्मरत जनकल्याणवसतिम्।। ४ ।।

त्रयाणां लोकानां त्वमसि शरणं नाथ परमं
त्वमेव प्रख्यातः प्रणतजनबन्धुः परिवृढः
ममार्तिं छित्त्वा त्वं परमकृपया पालयसि मां
जगन्नाथं देवं स्मरत जनकल्याणवसतिम्।। ५ ।।

सदा ये ध्यायन्ति श्रुतिनिगदितं ते सुचरितं
न तेषां सन्तापो न च भवति भीतिस्त्रिभुवने।
परानन्दस्तेषां हृदि लसति पुण्ये प्रमुदिते
जगन्नाथं देवं स्मरत जनकल्याणवसतिम्।। ६ ।।

तव व्यक्तं रूपं पुरि महितमत्यन्तललितं
परं दृष्ट्वा भक्ता विपुलमभिनन्दन्ति विभुताम्।
दयासिन्धोर्दृष्टिर्जनयति न किं कल्पलतिकां
जगन्नाथं देवं स्मरत जनकल्याणवसतिम्।। ७ ।।

चलोर्म्यार्द्रो वातो जनितपरितोषस्तव गृहे
सदोपास्ते सेव्यं परिगततनुं दास्यविभवः।
समुद्रस्ते पादौ निरतिमुदितः क्षालयति वै
जगन्नाथं देवं स्मरत जनकल्याणवसतिम्।। ८ ।।

प्रवृद्धो व्यामोहः स्मरति न हितं दूषितधिया
सृतिं धर्म्यां लोकस्त्यजति हृतचेता विभवतः।
ततस्ते सौन्दर्यं भवतु मम कल्याणततये
जगन्नाथं देवं स्मरत जनकल्याणवसतिम्।। ६ ।।

प्रभुः श्यामश्चित्ते वसतु रमणीसङ्गमुदितो
यथा विद्युच्छोभासहितजलदोऽखण्डगगने।
प्रभावैरुद्रिक्तैर्घटय मम सम्मानममितं
जगन्नाथं देवं स्मरत जनकल्याणवसतिम्।। १० ।।

द्विजेनामरनाथेन पाण्डेयान्वयजन्मना।
प्रणीतं फलदं स्तोत्रं जगन्नाथः प्रसीदतु।। ११ ।।

......

पुस्तक परिचयः

मङ्गल्या में ऐसी कविताएँ सङ्गृहीत हैं, जो मानव-कल्याण के लिए मार्ग का निर्माण करती हैं और मानव के परम लक्ष्य का प्रकाशन करती हैं। भारत में साधना की अनेक भूमिकाएँ हैं और उनमें क्रम भी है। उन भूमिकाओं पर क्रमशः आरूढ़ होना पड़ता है। मनुष्य की चित्तवृत्ति के अनुसार भिन्न-भिन्न मार्गों का निर्माण किया गया है। मनुष्य उनके समाधान के लिए भी प्रयत्नशील रहता है। मङ्गल के लिए हमारा प्रयत्न सभी दृष्टियों से चलता रहता है।

मङ्गल्या में समाज के अनेक पक्ष विन्यस्त हैं। वर्तमान काल की समस्याएँ भी परीक्षित हैं। आध्यात्मिक दृष्टि से भी जीवन की समीक्षा की गयी है। यद्यपि काव्य के धरातल पर कवि की अनुभूतियाँ प्रतिष्ठित हैं, किन्तु सहृदय की दृष्टि से पर्यालोचना करने पर अनेक गम्भीर तथा महत्त्वपूर्ण तत्त्वों का सन्निवेश इस काव्य में देखा जा सकता है। डॉ० पाण्डेय की काव्य-प्रतिभा व्यापक सन्दर्भों का आलिङ्गन करती है तथा भाषा शैली के अभिनव प्रयोगों के आधार पर अचुम्बित साहित्य का निर्माण करती है। मङ्गल्या समाज का परिष्कार करने वाली प्रक्रिया भी है तथा परम तत्त्व का साक्षात्कार कराने वाली दार्शनिक दृष्टि भी है।

भारतीय विद्या प्रकाशन

1, यू० बी० जवाहर नगर, बैंग्लो रोड
दिल्ली—110007
दिल्ली

पो. बा. 1108. कचौड़ी गली
वाराणसी—221001
वाराणसी